

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

## षष्ठकाण्डे प्रथमः प्रश्नः

### सोममन्त्रब्राह्मणनिरूपणं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

प्राचीनवꣳशङ्करोति देवमनुष्या दिशो व्यभजन्त प्राचीन्देवा दक्षिणा पितरः प्रतीचीम्म-
नुष्या उदीचीꣳ रुद्रा यत् प्राचीनवꣳशङ्करोति देवलोकमेव तद्यजमान उपावर्तते परि श्रय-
त्यन्तर्हितो हि देवलोको मनुष्यलोकान्नास्माल्लोकाथ् स्वेतव्यमिवेत्याहुः को हि तद्वेद यद्य-
मुष्मिल्लोकेऽस्ति वा न वेति दिक्ष्वतीकाशान् करो ॥ [१] ॥ त्युभयोर् लोकयोरभिजित्यै
केशश्मश्रु वपते नखानि नि कृन्तते मृता वा एषा त्वगमेद्ध्या यत् केशश्मश्रु मृतामेव त्वच-
ममेद्ध्यामपहत्य यज्ञियो भूत्वा मेधमुपैत्यङ्गिरसः सुवर्गँल्लोकँय्यन्तोऽफ्सु दीक्षातपसी प्रवे-
शयन्नफ्सु स्नाति साक्षादेव दीक्षातपसी अव रुन्धे तीर्थे स्नाति तीर्थे हि ते ताम्प्रावे-
शयन् तीर्थे स्नाति ॥ [२] ॥ तीर्थमेव समानानाम्भवत्यपोऽश्ञात्यन्तरत एव मेद्ध्यो भवति
वाससा दीक्षयति सौम्यँव्वै क्षौमन्देवतया सोममेष देवतामुपैति यो दीक्षते सोमस्य तनू-
रसि तनुवम्मे पाहीत्याह स्वामेव देवतामुपैत्यथो आशिषमेवैतामा शास्तेऽग्नेस्तूषाधानँव्वायोर्
वातपानम्पितृणां नीविरोषधीनाम्प्रघात ॥ [३] ॥ आदित्यानाम्प्राचीनतानो विश्वेषान्देवाना-
मोतुर् नक्षत्राणामतीकाशास्तद्वा एतथ् सर्वदेवत्यँय्यद्वासो यद्वाससा दीक्षयति सर्वाभिरेवै-
नन्देवताभिर् दीक्षयति बहिःप्राणो वै मनुष्यस्तस्याशनम्प्राणोऽश्ञाति सप्राण एव दीक्षत
आशितो भवति यावानेवास्य प्राणस्तेन सह मेधमुपैति घृतन्देवानां मस्तु पितृणान्निष्पक्वम्म-
नुष्याणान्तद् वा ॥ [४] ॥ एतथ् सर्वदेवत्यँय्यन्नवनीतँय्यन्नवनीतेनाभ्यङ्क्ते सर्वा एव देवताः

प्रीणाति प्रच्युतो वा एषोँऽस्माल्लोकादगतो देवलोकय्यँो दीक्षितोँऽन्तरेव नवनीतन्तस्मान्नवनी-
तेनाभ्यङ्क्तेऽनुलोमयँ्यजुषा व्यावृत्त्या इन्द्रो वृत्रमहन् तस्य कनीनिका पराऽपतत् तदाञ्जनमभव-
द्यदाङ्क्ते चक्षुरेव भ्रातृव्यस्य वृङ्क्ते दक्षिणम्पूर्वमाऽङ्क्ते ॥ [५] ॥ सव्यꣳ हि पूर्वम्मनुष्या आञ्जते
न नि धावते नीव हि मनुष्या धावन्ते पञ्च कृत्व आऽङ्क्ते पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमे-
वाव रुन्धे परिमितमाऽङ्क्तेऽपरिमितꣳ हि मनुष्या आञ्जते सतूलयाऽऽ*ङ्क्तेऽपतूलया हि मनुष्या
आञ्जते व्यावृत्त्यै यदपतूलयाऽऽञ्जीत वज्र इव स्याथ् सतूलयाऽऽ*ङ्क्ते मित्रत्वाये ॥ [६] ॥
न्द्रो वृत्रमहन्थ्सोँऽ(१)पोँऽ(१)भ्यम्रियत तासाय्यँन्मेद्ध्यय्यँज्ञियꣳ सदेवमासीत् तदपोदक्रामत्
ते दर्भा अभवन्यद्दर्भपुञ्जीलैः पवयति या एव मेद्ध्या यज्ञियाः सदेवा आपस्ताभिरेवैनम्पवयति
द्वाभ्याँम्पवयत्यहोरात्राभ्यामेवैनम्पवयति त्रिभिः पवयति त्रय इमे लोका एभिरेवैनल्ँलोकैः पव-
यति पञ्चभिः ॥ [७] ॥ पवयति पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञायैवैनम्पवयति षड्भिः पव-
यति षड् वा ऋतव ऋतुभिरेवैनम्पवयति सप्तभिः पवयति सप्त छन्दाꣳसि छन्दोभिरेवैनम्पवयति
नवभिः पवयति नव वै पुरुषे प्राणाः सप्राणमेवैनम्पवयत्येकविꣳशत्या पवयति दश हस्त्या अङ्गु-
लयो दश पद्या आत्मैकविꣳशो यावानेव पुरुषस्तमपरिवर्गं ॥ [८] ॥ पवयति चित्पतिस्त्वा
पुनात्वित्याह मनो वै चित्पतिर् मनसैवैनम्पवयति वाक्पतिस्त्वा पुनात्वित्याह वाचैवैनम्पवयति
देवस्त्वा सविता पुनात्वित्याह सवितृप्रसूत एवैनम्पवयति तस्य ते पवित्रपते पवित्रेण यस्मै
कम्पुने तच्छकेयमित्याहाऽऽशिषमेवैतामा शास्ते ॥ [९] ॥

(अतीकाशान् करोत्य वेशयन् तीर्थे स्नाति प्रघातो मनुष्याणान्तद्वा आऽङ्क्ते मित्रत्वाय पञ्चभिरपरिवर्गमष्टाचत्वारिꣳशच्च) ॥
१ ॥

---

यावन्तो वै देवा यज्ञायापुनत त एवाभवन्य एवव्ँविद्वान्यज्ञाय पुनीते भवत्येव बहिः पव-
यित्वाऽन्तः प्र पादयति मनुष्यलोक एवैनम्पवयित्वा पूतन्देवलोकम्प्र णयत्यदीक्षित एक-
याऽऽहुत्येत्याहुः स्रुवेण चतस्रो जुहोति दीक्षितत्वाय स्रुचा पञ्चमीम्पञ्चाक्षरा पङ्क्तिः पाङ्क्तो
यज्ञो यज्ञमेवाव रुन्ध आकूत्यै प्रयुजेऽग्नये ॥ [१०] ॥ स्वाहेत्याहाऽऽकूत्या हि पुरुषो यज्ञ-
मभि प्रयुङ्क्ते यजेयेति मेधायै मनसेऽग्नये स्वाहेत्याह मेधया हि मनसा पुरुषो यज्ञमभिगच्छति

सरस्वत्यै पूष्णेऽग्नये स्वाहेत्याह वाग्व सरस्वती पृथिवी पूषा वाचैव पृथिव्या यज्ञम्प्र युङ्क्त आपो देवीर् बृहतीर् विश्वशंभुव इत्याह या वै वर्ष्यास्ता ॥ [११] ॥ आपो देवीर् बृहतीर् विश्वशं-भुवो यदेतद्यजुर् न ब्रूयाद्दिव्या आपोऽशान्ता इमँल्लोकमा गच्छेयुरापो देवीर् बृहतीर् विश्वशं-भुव इत्याहास्मा एवैना लोकाय शमयति तस्माच्छान्ता इमँल्लोकमा गच्छन्ति द्यावापृथिवी इत्याह द्यावापृथिव्योर्हि यज्ञ उर्वन्तरिक्षमित्याहान्तरिक्षे हि यज्ञो बृहस्पतिर् नो हविषा वृधात्वि ॥ [१२] ॥ त्याह ब्रह्म वै देवानाम्बृहस्पतिर् ब्रह्मणैवास्मै यज्ञमव रुन्धे यद्ब्रूयाद्विधे-रिति यज्ञस्थाणुमृच्छेद्वृधात्वित्याह यज्ञस्थाणुमेव परि वृणक्ति प्रजापतिर् यज्ञमसृजत सोऽस्माथ् सृष्टः पराङैथ् स प्र यजुरव्लीनात् प्र साम तमृगुदयच्छद्यदृगुदयच्छत् तदौद्ग्रहणस्यौद्ग्रहणत्वमृचा ॥ [१३] ॥ जुहोति यज्ञस्योद्यत्या अनुष्टुप्छन्दसामुदयच्छदित्याहुस्तस्मादनुष्टुभा जुहोति यज्ञ-स्योद्यत्यै द्वादश वाथ्सबन्धान्युदयच्छन्नित्याहुस्तस्माद्द्वादशभिर् वाथ्सबन्धविदो दीक्षयन्ति सा वा एषर्गनुष्टुग्वागनुष्टुग्यदेतयर्चा दीक्षयति वाचैवैनꣳ सर्वया दीक्षयति विश्वे देवस्य नेतुरित्याह सावित्र्येतेन मर्तो वृणीत सख्य ॥ [१४] ॥ मित्याह पितृदेवत्यैतेन विश्वे राय इषुद्ध्यसीत्याह वैश्वदेव्येतेन द्युम्नँवृणीत पुष्यस इत्याह पौष्ण्येतेन सा वा एषर्ख् सर्वदेवत्या यदेतयर्चा दीक्षयति सर्वाभिरेवैनन्देवताभिर् दीक्षयति सप्ताक्षरम्प्रथमम्पदमष्टाक्षराणि त्रीणि यानि त्रीणि तान्य-ष्टावुप यन्ति यानि चत्वारि तान्यष्टौ यदष्टाक्षरा तेन ॥ [१५] ॥ गायत्री यदेकादशाक्षरा तेन त्रिष्टुग्यद् द्वादशाक्षरा तेन जगती सा वा एषर्ख् सर्वाणि छन्दाꣳसि यदेतयर्चा दीक्षयति सर्वै-भिरेवैनञ्छन्दोभिर् दीक्षयति सप्ताक्षरम्प्रथमम्पदꣳ सप्तपदा शक्करी पशवः शक्करी पशूनेवाव रुन्ध एकस्मादक्षरादनाप्तम्प्रथमम्पदन्तस्माद्यद् वाचोऽनाप्तन्तन्मनुष्या उप जीवन्ति पूर्णया जुहोति पूर्ण इव हि प्रजापतिः प्रजापतेराप्त्यै न्यूनया जुहोति न्यूनाद्धि प्रजापतिः प्रजा असृजत प्रजानाꣳ सृष्ट्यै ॥ [१६] ॥

(अग्नये ता वृधात्वृ चा सख्यं तेन जुहोति पञ्चदश च) ॥ २ ॥

ऋक्सामे वै देवेभ्यो यज्ञायाऽतिष्ठमाने कृष्णो रूपङ्कृत्वाऽपक्रम्यातिष्ठतान्तेऽमन्यन्त यँवा इमे उपावर्थ्स्यतः स इदम्भविष्यतीति ते उपामन्त्रयन्त ते अहोरात्रयोर् महिमानमपनिधाय

देवानुपावर्तेतामेष वा ऋचो वर्णो यच्छुक्लङ्कृष्णाजिनस्यैष साम्नो यत् कृष्णमृख्सामयोः शिल्पे
स्थ इत्याहर्ख्सामे एवाव रुन्ध एष ॥ [१७] ॥ वा अह्नो वर्णो यच्छुक्लङ्कृष्णाजिनस्यैष रात्रिया
यत् कृष्णय्यँदेवैनयोस्तत्र न्यक्तं तदेवाव रुन्धे कृष्णाजिनेन दीख्षयति ब्रह्मणो वा एतद्रू-
पय्यँत् कृष्णाजिनम्ब्रह्मणैवैनन्दीख्षयतीमान्धियः शिख्षमाणस्य देवेत्याह यथायजुरेवैतद्गर्भो
वा एष यद्दीख्षित उल्बव्वाँसः प्रोर्णुते तस्माद् ॥ [१८] ॥ गर्भाः प्रावृता जायन्ते न पुरा
सोमस्य क्रयादपोर्णुवीत यत् पुरा सोमस्य क्रयादपोर्णुवीत गर्भाः प्रजानाम्परापातुकाः स्युः क्रीते
सोमेऽपोर्णुते जायत एव तदथो यथा वसीयाःसम्प्रत्यपोर्णुते तादृगेव तदङ्गिरसः सुवर्गल्लोँक-
य्यँन्त ऊर्जव्व्यँभजन्त ततो यदत्यशिष्यत ते शरा अभवन्नूर्ग् वै शरा यच्छरमयी ॥ [१९] ॥
मेखला भवत्यूर्जमेवाव रुन्धे मद्ध्यतः सन्नह्यति मद्ध्यत एवास्मा ऊर्जन्दधाति तस्मान्मद्ध्यत
ऊर्जा भुञ्जत ऊर्द्ध्वव्वैँ पुरुषस्य नाभ्यै मेद्ध्यमवाचीनममेद्ध्यय्यँन्मद्ध्यतः सन्नह्यति मेद्ध्यञ्चै-
वास्यामेद्ध्यञ्च व्यावर्तयतीन्द्रो वृत्राय वज्रम्प्राहरथ् स त्रेधा व्यभवथ् स्फ्यस्तृतीयः रथस्तृतीय-
य्यूँपस्तृतीय ॥ [२०] ॥ य्यँेऽन्तःशरा अशीर्यन्त ते शरा अभवन् तच्छराणाः शरत्वव्वँज्रो वै
शराः ख्षुत् खलु वै मनुष्यस्य भ्रातृव्यो यच्छरमयी मेखला भवति वज्रेणैव साख्षात् ख्षुधम्भ्रा-
तृव्यम्मद्ध्यतोऽप हते त्रिवृद्भवति त्रिवृद्वै प्राणस्त्रिवृतमेव प्राणम्मद्ध्यतो यजमाने दधाति पृथ्वी
भवति रज्जूनाव्व्यँावृत्त्यै मेखलया यजमानन्दीख्षयति योक्त्रेण पत्नीम्मिथुनत्वाय ॥ [२१] ॥
यज्ञो दख्षिणामभ्यद्ध्यायत् ताः समभवत् तदिन्द्रोऽचायथ् सोऽमन्यत यो वा इतो जनिष्यते
स इदम्भविष्यतीति ताम्प्राविशत् तस्या इन्द्र एवाजायत सोऽमन्यत यो वै मदितोऽपरो जनि-
ष्यते स इदम्भविष्यतीति तस्या अनुमृश्य योनिमाऽच्छिनथ् सा सूतवशाऽभवत् तथ् सूतव-
शायै जन्म ॥ [२२] ॥ ताः हस्ते न्यवेष्टयत ताम्मृगेषु न्यदधाथ् सा कृष्णविषाणाऽभवदि-
न्द्रस्य योनिरसि मा मा हिंसीरिति कृष्णविषाणाम्प्र यच्छति सयोनिमेव यज्ञङ्करोति सयोनिन्द-
ख्षिणाः सयोनिमिन्द्रः सयोनित्वाय कृष्यै त्वा सुसस्याया इत्याह तस्मादकृष्टपच्या ओषधयः
पच्यन्ते सुपिप्पलाभ्य स्त्वौषधीभ्य इत्याह तस्मादोषधयः फलङ्गृह्णन्ति यद्धस्तेन ॥ [२३] ॥
कण्डूयेत पामनम्भावुकाः प्रजाः स्युर् यथ् स्मयेत नग्नम्भावुकाः कृष्णविषाणया कण्डूयतेऽपिगृह्य
स्मयते प्रजानाङ्गोपीथाय न पुरा दख्षिणाभ्यो नेतोः कृष्णविषाणामव चृतेद्यत् पुरा दख्षिणाभ्यो

नेतोः कृष्णविषाणामवचृतेद्योनिः प्रजानाम्परापातुका स्यान्नीतासु दख्षिणासु चात्वाले कृष्ण-
विषाणाम्प्रास्यति योनिर् वै यज्ञस्य चात्वालय्ँयोनिः कृष्णविषाणा योनावेव योनिन्दधाति यज्ञस्य
सयोनित्वाय ॥ [२४] ॥

(रुन्ध एष तस्माँच्छरमयी यूपस्तृतीयं मिथुनत्वाय जन्म हस्तेना ष्टाचत्वारिꣳशच्च) ॥ ३ ॥

वाग्वै देवेभ्योऽपाक्रामद्यज्ञायातिष्ठमाना सा वनस्पतीन् प्राविशत् सैषा वाग्वनस्पतिषु वदति
या दुन्दुभौ या तूणवे या वीणायाय्ँयद् दीख्षितदण्डम्प्रयच्छति वाचमेवाव रुन्ध औदुंबरो भव-
त्यूर्गा उदुंबर ऊर्जमेवाव रुन्धे मुखेन सम्मितो भवति मुखत एवास्मा ऊर्जन्दधाति तस्मान्
मुखत ऊर्जा भुञ्जते ॥ [२५] ॥ क्रीते सोमे मैत्रावरुणाय दण्डम्प्र यच्छति मैत्रावरुणो हि
पुरस्तादृत्विग्भ्यो वाचव्ँविभजति तामृत्विजो यजमाने प्रति ष्ठापयन्ति स्वाहा यज्ञम्मनसेत्याह
मनसा हि पुरुषो यज्ञमभिगच्छति स्वाहा द्यावापृथिवीभ्यामित्याह द्यावापृथिव्योर्हि यज्ञः
स्वाहोरोरन्तरिख्षादित्याहान्तरिख्षे हि यज्ञः स्वाहा यज्ञव्ँवातादा रभ इत्याहाय ॥ [२६] ॥
व्ँवाव यः पवते स यज्ञस्तमेव साख्षादा रभते मुष्टी करोति वाचय्ँयच्छति यज्ञस्य धृत्या
अदीख्षिष्टायम्ब्राह्मण इति त्रिरुपाꣳश्वाह देवेभ्य एवैनम्प्राऽऽह त्रिरुच्चैरुभयेभ्य एवैनन्देवम-
नुष्येभ्यः प्राऽऽह न पुरा नख्षत्रेभ्यो वाचव्ँवि सृजेद्यत्पुरा नख्षत्रेभ्यो वाचव्ँविसृजेद्यज्ञव्ँवि
च्छिन्द्या ॥ [२७] ॥ दुदितेषु नख्षत्रेषु व्रतङ्कृणुतेति वाचव्ँवि सृजति यज्ञव्रतो वै दीख्षितो
यज्ञमेवाभि वाचव्ँवि सृजति यदि विसृजेद्वैष्णवीमृचमनु ब्रूयाद्यज्ञो वै विष्णुर् यज्ञेनैव यज्ञꣳ
सन्तनोति दैवीन्धियम्मनामह इत्याह यज्ञमेव तन्म्रदयति सुपारा नो असद्वश इत्याह व्युष्टिमे-
वाव रुन्धे ॥ [२८] ॥ ब्रह्मवादिनो वदन्ति होतव्यन्दीख्षितस्य गृहा(३) इ न होतव्या(३)मिति
हविर् वै दीख्षितो यज्जुहुयाद्यजमानस्यावदाय जुहुयाद्यन्न जुहुयाद्यज्ञपरुरन्तरियाद्ये देवा मनो-
जाता मनोयुज इत्याह प्राणा वै देवा मनोजाता मनोयुजस्तेष्वेव परोख्षञ्जुहोति तन्नेव हुत-
न्नेवाहुतꣳ स्वपन्तव्ँवै दीख्षितꣳ रख्षाꣳसि जिघाꣳसन्त्यग्निः ॥ [२९] ॥ खलु वै रख्षो-
हाऽग्ने त्वꣳ सु जागृहि वयꣳ सु मन्दिषीमहीत्याहाग्निमेवाधिपाङ्कृत्वा स्वपिति रख्षसामपहत्या
अव्रत्यमिव वा एष करोति यो दीख्षितः स्वपिति त्वमग्ने व्रतपा असीत्याहाग्निर् वै देवाना-

वँव्रतपतिः स एवैनवँव्रतमालंभयति देव आ मर्त्येष्वेत्याह देवो ॥ [३०] ॥ ह्येष सन् मर्त्येषु त्वयँय्यज्ञेष्वीड्य इत्याहैतꣳ हि यज्ञेष्वीडतेऽप वै दीक्षिताथ् सुषुपुष इन्द्रियन्देवताः क्रामन्ति विश्वे देवा अभि मामाऽववृत्रन्नित्याहेन्द्रियेणैवैनन्देवताभिः सन्नयति यदेतद्यजुर् न ब्रूयाद्यावत एव पशूनभि दीक्षेत तावन्तोऽस्य पशवः स्यू रास्वेयथ् ॥ [३१] ॥ सोमाऽऽभूयो भरेत्याहापरिमितानेव पशूनव रुन्धे चन्द्रमसि मम भोगाय भवेत्याह यथादेवत मेवैनाः प्रति गृह्णाति वायवे त्वा वरुणाय त्वति यदेवमेता नानुदिशेदयथादेवतन्दक्षिणा गमयेदा देवताभ्यो वृश्च्येत यदेवमेता अनुदिशति यथादेवतमेव दक्षिणा गमयति न देवताभ्य आ ॥ [३२] ॥ वृश्च्यते देवीरापो अपान्नपादित्याह यद्वो मेध्यँय्यज्ञियꣳ सदेवन्तद्वो माऽव क्रमिषमिति वावैतदाहाच्छिन्नन्तन्तुम्पृथिव्या अनु गेषमित्याह सेतुमेव कृत्वाऽत्येति ॥ [३३] ॥

(भुञ्जते ऽयं छिन्द्याद् रुन्धे ऽग्नि राह देव इयद् देवताभ्य आ त्रयस्त्रिꣳशच्च) ॥ ४ ॥

देवा वै देवयजनमध्यवसाय दिशो न प्राजानन् ते(१)ऽन्योऽन्यमुपाधावन् त्वया प्र जानाम त्वयेति तेऽदित्याꣳ समध्रियन्त त्वया प्र जानामेति साऽब्रवीद्वरँव्वृणै मत्प्रायणा एव वो यज्ञा मदुदयना असन्निति तस्मादादित्यः प्रायणीयो यज्ञानामादित्य उदयनीयः पञ्च देवता यजति पञ्च दिशो दिशाम्प्रज्ञात्या ॥ [३४] ॥ अथो पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्धे पथ्याꣳ स्वस्तिमयजन् प्राचीमेव तया दिशम्प्राजानन्नग्निना दक्षिणा सोमेन प्रतीचीꣳ सवित्रोदीचीमदित्योर्ध्वाम्पथ्याꣳ स्वस्तिय्यँजति प्राचीमेव तया दिशम्प्र जानाति पथ्याꣳ स्वस्तिमिष्ट्वाऽग्नीषोमौ यजति चक्षुषी वा एते यज्ञस्य यदग्नीषोमौ ताभ्यामेवानु पश्य ॥ [३५] ॥ त्यग्नीषोमाविष्ट्वा सवितारँय्यजति सवितृप्रसूत एवानु पश्यति सवितारमिष्ट्वाऽदितिय्यँजतीयँव्वा अदितिरस्यामेव प्रतिष्ठायानु पश्यत्यदितिमिष्ट्वा मारुतीमृचमन्वाह मरुतो वै देवानाव्विँशो देवविशङ्खलु वै कल्पमानम्मनुष्यविशमनु कल्पते यन् मारुतीमृचमन्वाह विशाङ्क्लृप्त्यै ब्रह्मवादिनो वदन्ति प्रयाजवदननूयाजम्प्रायणीयङ्कार्यमनूयाजव ॥ [३६] ॥ दप्रयाजमुदयनीयमितीमे वै प्रयाजा अमी अनूयाजाः सैव सा यज्ञस्य सन्ततिस्तत् तथा न कार्यमात्मा वै प्रयाजाः प्रजाऽनूयाजा यत् प्रयाजानन्तरियादात्मानमन्तरियाद्यदनूयाजानन्तरियात् प्रजामन्तरियाद्यतः खलु वै यज्ञस्य

वितंतस्य न क्रियते तदनु यज्ञः परा भवति यज्ञम्पराभवन्तय्यँजमानोऽनु ॥ [३७] ॥ परा भवति प्रयाजवदेवानूयाजवत् प्रायणीयङ्कार्यम्प्रयाजवदनूयाजवदुदयनीयं नाऽऽत्मानमन्तरेति न प्रजान्न यज्ञः पराभवति न यजमानः प्रायणीयस्य निष्कास उदयनीयमभि निर् वपति सैव सा यज्ञस्य सन्ततिर् याः प्रायणीयस्य याज्या यत् ता उदयनीयस्य याज्याः कुर्यात् पराङ्मुल्लोकमा रोहेत् प्रमायुकः स्याद्याः प्रायणीयस्य पुरोनुवाक्यास्ता उदयनीयस्य याज्याः करोत्यस्मिन्नेव लोके प्रति तिष्ठति ॥ [३८] ॥

(प्रज्ञात्यै पश्यत्य नूयाजव द्यजमानोऽनु पुरोनुवाक्यास्ता अष्टौ च) ॥ ५ ॥

कद्रूश्च वै सुपर्णी चाऽऽत्मरूपयोरस्पर्धेताꣳ सा कद्रूः सुपर्णीमजयथ् साऽब्रवीत् तृतीयस्यामितो दिवि सोमस्तमा हर तेनाऽऽत्मानन्निष्क्रीणीष्वेतीयवैँ कद्रूरसौ सुपर्णी छन्दाꣳसि सौपर्णेयाः साऽब्रवीदस्मै वै पितरौ पुत्रान् बिभृतस्तृतीयस्यामितो दिवि सोमस्तमा हर तेनाऽऽत्मानन्नि ष्क्रीणीष्वे ॥ [३९] ॥ ति मा कद्रूरवोचदिति जगत्युदपतच्चतुर्दशाक्षरा सती साऽप्राप्य न्यवर्तत तस्यै द्वे अक्षरे अमीयेताꣳ सा पशुभिश्च दीक्षया चाऽगच्छत् तस्माज्जगती छन्दसाम्पशव्यतमा तस्मात् पशुमन्तं दीक्षोप नमति त्रिष्टुगुदपतत् त्रयोदशाक्षरा सती साऽप्राप्य न्यवर्तत तस्यै द्वे अक्षरे अमीयेताꣳ सा दक्षिणाभिश्च ॥ [४०] ॥ तपसा चाऽगच्छत् तस्मात् त्रिष्टुभो लोके माद्ध्यन्दिने सवने दक्षिणा नीयन्त एतत् खलु वाव तप इत्याहुर् यः स्वन्ददातीति गायत्र्युदपतच्चतुरक्षरा सत्यजया ज्योतिषा तमस्या अजाऽभ्यरुन्ध तदजाया अजत्वꣳ सा सोमञ्चाऽऽ*हरच्चत्वारि चाक्षराणि साऽष्टाक्षरा समपद्यत ब्रह्मवादिनो वदन्ति ॥ [४१] ॥ कस्माथ् सत्याद्गायत्री कनिष्ठा छन्दसाꣳ सती यज्ञमुखम्परीयायेति यदेवादः सोममाऽहरत् तस्माद्यज्ञमुखम्पर्यैत् तस्मात् तेजस्विनीतमापद्भ्यान्द्वे सवने समगृह्णान् मुखेनैकय्यँन्मुखेन समगृह्णात् तदधयत् तस्माद् द्वे सवने शुक्रवती प्रातस्सवनञ्च माद्ध्यन्दिनञ्च तस्मात् तृतीयसवन ऋजीषमभि षुण्वन्ति धीतमिव हि मन्यन्त ॥ [४२] ॥ आशिरमव नयति सशुक्रत्वायाथो सम्भरत्येवैनत् तꣳ सोममाह्रियमाणङ्गन्धर्वो विश्वावसुः पर्यमुष्णाथ् स तिस्रो रात्रीः परिमुषितोऽवसत् तस्मात् तिस्रो रात्रीः क्रीतः सोमो वसति ते देवा अब्रुवन्थ्

स्त्रीकामा वै गन्धर्वाः स्त्रिया नि ष्क्रीणामेति ते वाचꣳ स्त्रियमेकहायनीङ्कृत्वा तया निरक्रीणन्थ्
सा रोहिद्रूपङ्कृत्वा गन्धर्वेभ्यो ॥ [४३] ॥ ऽपक्रम्यातिष्ठत् तद्रोहितो जन्म ते देवा अब्रुवन्नप
युष्मदक्रमीन्नास्मानुपावर्तते वि ह्वयामहा इति ब्रह्म गन्धर्वा अवदन्नगायन् देवाः सा देवान्
गायत उपावर्तत तस्माद्गायन्तꣳ स्त्रियः कामयन्ते कामुका एनꣳ स्त्रियो भवन्ति य एवव्वे-
दाथो य एवव्विँद्वानपि जन्येषु भवति तेभ्य एव ददत्युत यद्बहुतया ॥ [४४] ॥ भवन्त्येकहा-
यन्या क्रीणाति वाचैवैनꣳ सर्वया क्रीणाति तस्मादेकहायना मनुष्या वाचव्वँदन्त्यकूटयाऽकर्ण-
याऽकाणयाऽश्लोणयाऽसप्तशफया क्रीणाति सर्वयैवैनङ्क्रीणाति यच्छ्वेतया क्रीणीयादुश्चर्मा यज-
मानः स्याद्यत् कृष्णयाऽनुस्तरणी स्यात् प्रमायुको यजमानः स्याद्यत् द्विरूपया वार्त्रघ्नी स्याथ्
स वाऽन्यञ्जिनीयात् तव्वाँऽन्यो जिनीयादरुणया पिङ्गाक्ष्या क्रीणात्येतद् वै सोमस्य रूपꣳ
स्वयैवैनं देवतया क्रीणाति ॥ [४५] ॥

(निष्क्रीणीष्व दक्षिणाभिश्च वदन्ति मन्यन्ते गन्धर्वेभ्योबहुतयाःपिङ्गाक्ष्यादश च) ॥ ६ ॥

---

तद्धिरण्यमभवत् तस्माद्द्भ्यो हिरण्यम्पुनन्ति ब्रह्मवादिनो वदन्ति कस्माथ् सत्यादनस्थि-
केन प्रजाः प्रवीयन्तेऽस्थन्वतीर् जायन्त इति यद्धिरण्यङ्घृतेऽवधाय जुहोति तस्मादनस्थिकेन
प्रजाः प्र वीयन्तेऽस्थन्वतीर् जायन्त एतद्वा अग्नेः प्रियन्धाम यद्घृतन्तेजो हिरण्यमियन्ते शुक्र
तनूरिदव्वँर्च इत्याह सतेजसमेवैनꣳ सतनुं ॥ [४६] ॥ करोत्यथो सम्भरत्येवैनय्यँदबद्धमव-
दध्याद् गर्भाः प्रजानाम्परापातुकाः स्युर् बद्धमव दधाति गर्भाणान्धृत्यै निष्टर्क्यम्बद्ध्नाति प्रजा-
नाम्प्रजननाय वाग् वा एषा यथ् सोमक्रयणी जूरसीत्याह यद्धि मनसा जवते तद्वाचा वदति धृता
मनसेत्याह मनसा हि वाग्धृता जुष्टा विष्णव इत्याह ॥ [४७] ॥ यज्ञो वै विष्णुर् यज्ञायैवैना-
ञ्जुष्टाङ्करोति तस्यास्ते सत्यसवसः प्रसव इत्याह सवितृप्रसूतामेव वाचमव रुन्धे काण्डेकाण्डे
वै क्रियमाणे यज्ञꣳ रक्षाꣳसि जिघाꣳसन्त्येष खलु वा अरक्षोहतः पन्था योऽग्नेश्च सूर्यस्य
च सूर्यस्य चक्षुराऽरुहमग्नेरक्ष्णः कनीनिकामित्याह य एवारक्षोहतः पन्थास्तꣳ समारो-
हति ॥ [४८] ॥ वाग्वा एषा यथ् सोमक्रयणी चिदसि मनाऽसीत्याह शास्त्येवैनामेतत् तस्मा-
च्छिष्टाः प्रजा जायन्ते चिदसीत्याह यद्धि मनसा चेतयते तद्वाचा वदति मनाऽसीत्याह यद्धि

मनसाऽभिगच्छति तत् करोति धीरसीत्याह यद्धि मनसा ध्यायति तद्वाचा ॥ [४९] ॥ वदति दक्षिणाऽसीत्याह दक्षिणा ह्येषा यज्ञियाऽसीत्याह यज्ञियामेवैनांङ्करोति क्षत्रियाऽसीत्याह क्षत्रिया ह्येषाऽदितिरस्युभयतश्शीर्ष्णीत्याह यदेवाऽऽदित्यः प्रायणीयो यज्ञानामादित्य उदयनीय स्तस्मादेवमाह यदबद्धा स्यादयता स्याद्यत् पदिबद्धाऽनुस्तरणी स्यात् प्रमायुको यजमानः स्याद् ॥ [५०] ॥ यत् कर्णगृहीता वार्त्रघ्नी स्याथ् स वाऽन्यञ्जिनीयात् तव्वाँऽन्यो जिनीयान्मित्रस्त्वा पदि बद्ध्नात्वित्याह मित्रो वै शिवो देवानान्तेनैवैनाम्पदि बद्ध्नाति पूषाऽद्ध्वनः पात्वित्याहेयव्वै पूषेमामेवास्या अधिपामकः समष्ट्या इन्द्रायाद्ध्यक्षायेत्याहेन्द्रमेवास्या अद्ध्यक्षङ्करो ॥ [५१] ॥ त्यनु त्वा मातामन्यतामनु पितेत्याहानुमतयैवैनया क्रीणाति सा देवि देवमच्छेहीत्याह देवी ह्येषा देवः सोम इन्द्राय सोममित्याहेन्द्राय हि सोम आह्रियते यदेतद्यजुर् न ब्रूयात् पराँच्येव सोमक्रयणीयाद् रुद्रस्त्वाऽऽवर्तयत्वित्याह रुद्रो वै क्रूरो ॥ [५२] ॥ देवानान्तमेवास्यै परस्ताद्दधात्यावृत्त्यै क्रूरमिव वा एतत् करोति यद्रुद्रस्य कीर्तयति मित्रस्य पथेत्याह शान्त्यै वाचा वा एष वि क्रीणीते यः सोमक्रयण्या स्वस्ति सोमसखा पुनरेहि सह रय्येत्याह वाचैव विक्रीय पुनरात्मन् वाचन्धत्तेऽनुपदासुकाऽस्य वाग् भवति य एवव्वेँद ॥ [५३] ॥

(सतनु विष्णव इत्याहसमारोहतिध्यायति तद् वाचायजमानः स्यात्करोति क्रूरो वेद) ॥ ७ ॥

षट् पदान्यनु नि क्रामति षडहव्वाँङ् नाति वदत्युत संव्वँथ्सरस्यायने यावत्येव वाक् तामव रुन्धे सप्तमे पदे जुहोति सप्तपदा शक्वरी पशवः शक्वरी पशूनेवाव रुन्धे सप्त ग्राम्याः पशवः सप्ताऽऽरण्याः सप्त छन्दाꣳस्युभयस्यावरुद्ध्यै वस्व्यसि रुद्राऽसीत्याह रूपमेवास्या एतन् महिमान ॥ [५४] ॥ व्वँयाचष्टे बृहस्पतिस्त्वा सुम्ने रण्वत्वित्याह ब्रह्म वै देवानाम्बृहस्पतिर् ब्रह्मणैवास्मै पशूनव रुन्धे रुद्रो वसुभिरा चिकेत्वित्याहाऽऽ*वृत्त्यै पृथिव्यास्त्वा मूर्द्धन्ना जिघर्मि देवयजन इत्याह पृथिव्या ह्येष मूर्द्धा यद्देवयजनमिडायाः पद इत्याहेडायै ह्येतत् पदय्यँथ् सोमक्रयण्यै घृतवति स्वाहे ॥ [५५] ॥ त्याह यदेवास्यै पदाद्घृतमपीड्यत तस्मादेवमाह यदद्ध्वर्युरनग्नावाहुतिञ्जुहुयादन्धोऽद्ध्वर्युः स्याद्रक्षाꣳसि यज्ञꣳ हन्युर्हिरण्यमुपास्य जुहोत्यग्निवत्येव जुहोति नान्धोऽद्ध्वर्युर् भवति न यज्ञꣳ रक्षाꣳसि घ्नन्ति काण्डेकाण्डे वै क्रियमाणे

यज्ञꣳ रख्षाꣳसि जिघाꣳसन्ति परिलिखितꣳ रख्षः परिलिखिता अरातय इत्याह रख्षसामप-
हत्या ॥ [५६] ॥ इदमहꣳ रख्षसो ग्रीवा अपि कृन्तामि योऽस्मान् द्वेष्टि यञ्च वयन्द्विष्म इत्याह
द्वौ वाव पुरुषौ यञ्चैव द्वेष्टि यश्चैनन्द्वेष्टि तयोरेवानन्तरायङ्ग्रीवाः कृन्तति पशवो वै सोमक्रयण्यै पद-
य्ँयावत्त्मूतꣳ सँव्वँपति पशूनेवाव रुन्धेऽस्मे राय इति सँव्वँपत्यात्मानमेवाद्ध्वर्युः ॥ [५७] ॥
पशुभ्यो नान्तरेति त्वे राय इति यजमानाय प्र यच्छति यजमान एव रयिन्दधाति तोते राय
इति पत्निया अर्द्धो वा एष आत्मनो यत् पत्नी यथा गृहेषु निधत्ते तादृगेव तत् त्वष्टीमती ते
सपेयेत्याह त्वष्टा वै पशूनाम्मिथुनानाꣳ रूपकृद्रूपमेव पशुषु दधात्यस्मै वै लोकाय गार्हपत्य
आ धीयते ऽमुष्मा आहवनीयो यद्गार्हपत्य उपवपेदस्मिँल्लोके पशुमान्थ् स्याद्यदाहवनीयेऽमु-
ष्मिँल्लोके पशुमान्थ् स्यादुभयोरुप वपत्युभयोरेवैनँल्लोकयोः पशुमन्तङ्करोति ॥ [५८] ॥

(महिमानꣳ स्वाहा ऽपहत्या अद्ध्वर्युर् धीयते चतुर्विꣳशतिश्च) ॥ ८ ॥

ब्रह्मवादिनो वदन्ति विचित्यः सोमा(३) न विचित्या(३) इति सोमो वा ओषधीनाꣳ
राजा तस्मिन्यदापन्नङ्ग्रसितमेवास्य तद्यद्विचिनुयाद्यथाऽऽस्याद्ग्रसितन्निष्खिदति तादृगेव
तद्यन्न विचिनुयाद्यथाऽख्षन्नापन्नँव्विधावति तादृगेव तत् ख्षोधुकोऽद्ध्वर्युः स्यात् ख्षोधुको
यजमानः सोमविक्रयिन्थ् सोमꣳ शोधयेत्येव ब्रूयाद् यदीतर ॥ [५९] ॥ य्ँयदीतरमुभयेनैव
सोमविक्रयिणमर्पयति तस्माथ् सोमविक्रयी ख्षोधुकोऽरुणो ह स्माऽऽहोपवेशिः सोमक्रयण
एवाहन्तृतीयसवनमव रुन्ध इति पशूनाश्चर्मन् मिमीते पशूनेवाव रुन्धे पशवो हि तृतीयꣳ
सवनय्ँयङ्कामयेतापशुः स्यादित्यृख्षतस्तस्य मिमीतर्ख्षँव्वा अपशव्य मपशुरेव भवति यङ्काम-
येत पशुमान्थ् स्या ॥ [६०] ॥ दिति लोमतस्तस्य मिमीतैतद्वै पशूनाꣳ रूपꣳ रूपेणैवास्मै
पशूनव रुन्धे पशुमानेव भवत्यपामन्ते क्रीणाति सरसमेवैनङ्क्रीणात्यमात्योऽसीत्याहामैवैन-
ङ्कुरुते शुक्रस्ते ग्रह इत्याह शुक्रो ह्यस्य ग्रहोऽनसाऽच्छ याति महिमानमेवास्याच्छ यात्य-
नसा ॥ [६१] ॥ ऽच्छ याति तस्मादनोवाह्यꣳ समे जीवनय्ँयत्र खलु वा एतꣳ शीर्ष्णा हरन्ति
तस्माच्छीर्षहार्यङ्गिरौ जीवनमभि त्यन्देवꣳ सवितारमित्यतिच्छन्दसर्चा मिमीतेऽतिच्छन्दा
वै सर्वाणि छन्दाꣳसि सर्वेभिरेवैनञ्छन्दोभिर् मिमीते वर्ष्म वा एषा छन्दसाय्ँयदतिच्छन्दा

यदतिच्छन्दसर्चा मिमीते वर्ष्मैवैनꣳ समानानाङ्करोत्येकयैकयोत्सर्गं ॥ [६२] ॥ मिमीतेऽया-तयाम्नियायातयाम्नियैवैनम्मिमीते तस्मान्नानावीर्या अङ्गुलयः सर्वास्वङ्गुष्ठमुप नि गृह्णाति तस्माथ् समावद्वीर्योऽन्याभिरङ्गुलिभिस्तस्माथ् सर्वा अनु सञ्चरति यथ् सह सर्वाभिर् मिमीत सꣳश्लिष्टा अङ्गुलयो जायेरन्नेकयैकयोत्सर्गम्मिमीते तस्माद् विभक्ता जायन्ते पञ्च कृत्वो यजुषा मिमीते पञ्चाक्षरा पङ्क्तिः पाङ्क्तो यज्ञो यज्ञमेवाव रुन्धे पञ्च कृत्वस्तूष्णीं ॥ [६३] ॥ दश सम्पद्यन्ते दशाक्षरा विराडन्नँविराड् विराजैवान्नाद्यमव रुन्धे यद् यजुषा मिमीते भूतमेवाव रुन्धे यत् तूष्णीम्भविष्यद्यद्वै तावानेव सोमः स्याद् यावन्तम्मिमीते यजमानस्यैव स्यान्नापि सदस्याना-म्प्रजाभ्यस्त्वेत्युप समूहति सदस्यानेवान्वाभजति वाससोप नह्यति सर्वदेवत्यँवै ॥ [६४] ॥ वासः सर्वाभिरेवैनन्देवताभिः समर्द्धयति पशवो वै सोमः प्राणाय त्वेत्युप नह्यति प्राणमेव पशुषु दधाति व्यानाय त्वेत्यनु श्रन्थति व्यानमेव पशुषु दधाति तस्माथ् स्वपन्तम्प्राणा न जहति ॥ [६५] ॥

(इतरं पशुमान्थ् स्याद् यात्यनसो थ्सर्गं तूष्णीꣳ सर्वदेवत्यँवै त्रयस्त्रिꣳशच्च) ॥ ९ ॥

⋆

यत् कलया ते शफेन ते क्रीणानीति पणेतागोअर्घꣳ सोमङ्कुर्यादगोअर्घँय्यजमानमगोअ-र्घमद्ध्वर्युङ्गोस्तु महिमानन्नाव तिरेद् गवा ते क्रीणानीत्येव ब्रूयाद् गोअर्घमेव सोमङ्करोति गोअर्घँय्यजमानङ्गोअर्घमद्ध्वर्युन्न गोर् महिमानमव तिरत्यजया क्रीणाति सतपसमेवैनङ्क्री-णाति हिरण्येन क्रीणाति सशुक्रमेवै ॥ [६६] ॥ नङ्क्रीणाति धेन्वा क्रीणाति साशिरमेवैन-ङ्क्रीणात्यृषभेण क्रीणाति सेन्द्रमेवैनङ्क्रीणात्यनडुहा क्रीणाति वह्निर् वा अनड्वान्वह्निनैव वह्निं यज्ञस्य क्रीणाति मिथुनाभ्याङ्क्रीणाति मिथुनस्यावरुद्ध्यै वाससा क्रीणाति सर्वदेवत्यँवै वासः सर्वाभ्य एवैनन्देवताभ्यः क्रीणाति दश सम्पद्यन्ते दशाक्षरा विराडन्नँविराड् विराजैवान्नाद्य-मव रुन्धे ॥ [६७] ॥ तपसस्तनूरसि प्रजापतेर् वर्ण इत्याह पशुभ्य एव तदद्ध्वर्युर् नि ह्नुत आत्मनोऽनाव्रस्काय गच्छति श्रियम्प्र पशूनाप्नोति य एवँवेद शुक्रन्ते शुक्रेण क्रीणामीत्याह यथा यजुरेवैतद् देवा वै येन हिरण्येन सोममक्रीणन् तदभीषहा पुनराऽददत को हि तेजसा विक्रे-ष्यत इति येन हिरण्येन ॥ [६८] ॥ सोमङ्क्रीणीयात् तदभीषहा पुनरा ददीत तेज एवाऽऽत्मन्

धत्तेऽस्मे ज्योतिः सोमविक्रयिणि तम इत्याह ज्योतिरेव यजमाने दधाति तमसा सोमवि-
क्रयिणमर्पयति यदनुपग्रथ्य हन्याद्दन्दशूकास्ताꣳ समाꣳ सर्पाः स्युरिदमहꣳ सर्पाणान्दन्दशू-
कानाङ्ग्रीवा उप ग्रथ्नामीत्याहादन्दशूकास्ताꣳ समाꣳ सर्पा भवन्ति तमसा सोमविक्रयिणँव्वि-
द्ध्यति स्वान ॥ [६९] ॥ भ्राजेत्याहैते वा अमुष्मिँल्लोके सोममरख्षन् तेभ्योऽधि सोममाऽह-
रन्यदेतेभ्यः सोमक्रयणान्नानुदिशेदक्रीतोऽस्य सोमः स्यान्नास्यैतेऽमुष्मिँल्लोके सोमꣳ रख्षेयुर्
यदेतेभ्यः सोमक्रयणाननुदिशति क्रीतोऽस्य सोमो भवत्येतेऽस्यामुष्मिँल्लोके सोमꣳ रख्षन्ति
॥ [७०] ॥

(सशुक्रमेव रुन्ध इति येन हिरण्येन स्वान चतुश्चत्वारिꣳशच्च) ॥ १० ॥

वारुणो वै क्रीतः सोम उपनद्धो मित्रो न एहि सुमित्रधा इत्याह शान्त्या इन्द्रस्योरुमा विश
दख्षिणमित्याह देवा वै यꣳ सोममक्रीणन् तमिन्द्रस्योरौ दख्षिण आऽसादयन्नेष खलु वा एत-
र्हीन्द्रो यो यजते तस्मादेवमाहोदायुषा स्वायुषेत्याह देवता एवा न्वारभ्योत् ॥ [७१] ॥ तिष्ठ-
त्युर्वन्तरिख्षमन्विहीत्याहान्तरिख्षदेवत्यो(१) ह्येतर्हि सोमोऽदित्याः सदोऽस्यदित्याः सद
आ सीदेत्याह यथायजुरेवैतद् वि वा एनमेतदर्द्धयति यद् वारुणꣳ सन्तम्मैत्रङ्करोति वारुण्य-
र्चाऽऽसादयति स्वयैवैनन्देवतया समर्द्धयति वाससा पर्यानह्यति सर्वदेवत्यँव्वै वासः सर्वाभि-
रेवै ॥ [७२] ॥ नन्देवताभिः समर्द्धयत्यथो रख्षसामपहत्यै वनेषु व्यन्तरिख्षन्ततानेत्याह
वनेषु हि व्यन्तरिख्षन्ततान वाजमर्वथ्स्वित्याह वाजꣳ ह्यर्वथ्सु पयो अघ्नियास्वित्याह पयो
ह्यघ्नियासु हृथ्सु क्रतुमित्याह हृथ्सु हि क्रतुँव्वरुणो विख्ष्वग्निमित्याह वरुणो हि विख्ष्वग्नि-
न्दिवि सूर्य ॥ [७३] ॥ मित्याह दिवि हि सूर्यꣳ सोममद्रावित्याह ग्रावाणो वा अद्रयस्तेषु वा
एष सोमन्दधाति यो यजते तस्मादेवमाहोदु त्यञ्जातवेदसमिति सौर्यर्चा कृष्णाजिनम्प्रत्यान-
ह्यति रख्षसामपहत्या उस्रावेतन्धूर्षाहावित्याह यथायजुरेवैतत् प्र च्यवस्व भुवस्पत इत्याह
भूतानाꣳ ह्ये ॥ [७४] ॥ ष पतिर् विश्वान्यभि धामानीत्याह विश्वानि ह्ये(१) षोऽभि धामानि
प्रच्यवते मा त्वा परिपरी विददित्याह यदेवादः सोममाह्रियमाणङ्गन्धर्वो विश्वावसुः पर्यमुष्णात्
तस्मादेवमाहापरिमोषाय यजमानस्य स्वस्त्ययन्यसीत्याह यजमानस्यैवैष यज्ञस्यान्वारम्भोऽन-

वच्छित्त्यै वरुणो वा एष यजमानमभ्यैति यत् ॥ [७५] ॥ क्रीतः सोम उपनद्धो नमो मित्रस्य वरुणस्य चक्षसे इत्याह शान्त्या आ सोमँव्वहन्त्यग्निना प्रति तिष्ठते तौ संभवन्तौ यजमानमभि सम्भवतः पुरा खलु वावैष मेधायाऽऽत्मानमारभ्य चरति यो दीक्षितो यदग्नीषोमीयम्पशुमा-लभत आत्मनिष्क्रयण एवास्य स तस्मात् तस्य नाऽऽश्यम्पुरुषनिष्क्रयण इव ह्यथो खल्वाहु रग्नीषोमाभ्याँव्वा इन्द्रो वृत्रमहन्निति यदग्नीषोमीयम्पशुमालभते वार्त्रघ्न एवास्य स तस्माद्वाश्यं-व्वारुण्यर्चा परि चरति स्वयैवैनन्देवतया परि चरति ॥ [७६] ॥

(अन्वारभ्योथ्सर्वाभिरेवसूर्यं भूतानाङ्ङ् ह्यं ति य दाहुः सप्तविंशतिश्च) ॥ ११ ॥

---

## समाप्ति कोर्वैः

(प्राचीनवश्शं यावन्त ऋक्सामे वाग्वै देवेभ्यो देवा वै देवयजनं कद्रूश्च तद्धिरण्यश् षट् पदानि ब्रह्मवादिनो विचित्यो यत् कलया तेवारुणो वै क्रीतः सोमएकादश)
(प्राचीनवश्शङ्ङ् स्वाहेत्याह येऽन्तः शरा ह्येष सं तपसा च यत्कर्णगृही तेति लोमतो वारुणः षट्थ् सप्ततिः)
(प्राचीनवश्शं परि चरति)

॥ हरिः ॐ ॥

षष्ठकाण्डे प्रथमः प्रश्नः समाप्तः

| अनुवाकाः | पञ्चशत्यः |
|---|---|
| ११ | ७६ |

ॐ